Volume-5, Issue-8, August-2018 ISSN: 2349-7637 (Online)

RESEARCH HUB – International Multidisciplinary Research Journal (RHIMRJ)

Research Paper

Available online at: www.rhimrj.co.in

# संस्कृतव्याकरणाध्यापने पारम्परिक संङ्गणकसहकृत शिक्षण विध्योः तुलनात्मकमध्ययनम्

**ऋषिकेश मीणा**

सहायक आचार्य
राजकीय शास्त्रीय संस्कृत महाविधालय
चौथ का बरवाड़ा (सवाई माधोपुर)

वाचं धेनुमुपासिता इति श्रुतिवाक्यम्। अर्थात् वाक् धेनुः। सा कामदुधा भवति। समस्तं वाङ्मयम् अस्याः एव रूपान्तरम्। अलङ्कारसर्वस्वे प्रतिपादयति यत्-

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**

**वैखरी शब्दनिष्पत्तिर्मध्यमा स्मृतिगोचरा।**

**द्योतिकार्थस्य पश्यन्ती सूक्ष्मा ब्रह्मैव केवलम्।। इति।।**

वाक् चतुर्विधा अस्ति। परा पश्यन्ती, मध्यमा, वैखरी इति। अत्र पराब्रह्मस्वरूपा। एषा अवशिष्टानां त्रयाणाम् उदग्मस्थानम् च । पश्यन्ती - अर्थद्योतिका -मध्यमा ,स्मृतिगोचरा, वैखरी-शब्दरूपा।

## शुद्धोच्चारणविधयः-

छात्रेभ्यः संस्कृतध्वनीनां शब्दानां च उच्चारणस्य शास्त्रीयविधिना शिक्षणं प्रदातव्यं वर्त्तते। यदि शास्त्रपद्धत्या शिक्षणं न दीयते तर्हि छात्राणाम् उच्चारणं विकृतं भवेत्। संस्कृतस्य उच्चारणशिक्षणाय अधोदत्तविधयः प्रयोज्याः भवन्ति।

.१**अनुकरणविधिः -** अध्यापकः स्वयं संस्कृतध्वनीनां शब्दानां ,वर्णानां ,च उच्चारणं छात्राणां पुरतः सम्यक् कुर्यात्। छात्राः तदुच्चारणं शृत्वा अनुकृत्य च सम्यक् उच्चरन्ति। यतो हि छात्राणाम् आदर्शपुरुषः अध्यापकः एव। छात्राश्च नित्यं शिक्षकमनुकुर्वन्ति। अनुकरणं तेषां मुख्यलक्षणं भवति। अतः अध्यापकस्य आदर्शवाचनम् अतिमहत्त्वपूर्णं भवति। शुद्धोच्चारणस्य, सुवाचनकौशलस्य प्रस्तुतीकरणं तत्रैव भवति। तदानीम् अध्यापकः अल्पविराम, पूर्णविरामादिचिह्नन्यनुसृत्य सम्यक् पठेत्। तच्छ्रुत्वा छात्राणां च उच्चारणं वाचनं च सम्यक् भविष्यति।

२ .**आवृत्तिविधिः -** छात्राणाम् उच्चारणं यदि अशुद्धं भवति तर्हि संस्कृताध्यापकः छात्रैः वारं वारं ध्वनीनां वर्णानां शब्दानाम् आवृत्तिं कारयेत्। यावत् उच्चारणं सम्यक् भवति तावत् शुद्धोच्चारणस्य अभ्यासः कारणीय एव।

**३ .परिवर्त्तनविधि - :**कक्ष्यायां बहुवारम् अभ्यासकारणेनापि भूयोभूयः उच्चारणे दोषं कुर्वन्ति तदा तादृशछात्राणां स्थानं परिवर्त्य यः सम्यक् उच्चारणं करोति तस्य पार्श्वे उपावेशनीयम्। अन्यथा तेषाम् उच्चारणे शुद्धता नागच्छेत्।

**४ .अवरोधविधिः -** शीघ्रं शीघ्र वदति चेत् तस्य उच्चारणे अशुद्धम्, अस्पष्टं चागमिष्यति। अतः अस्मिन् समये अध्यापकः तेषां शीघ्रतायाम् अवरोधः करणीयः। शनैः शनैः उच्चारणाय अभ्यासः दातव्यः। गच्छति समये सः सम्यगुच्चारणे समर्थः भवति।

**५ .पूर्णताविधिः -**अस्मिन् विधौ ध्वनौ वर्णे शब्दे वा ध्यानं न दीयते। सम्पूर्णवाक्यस्य शुद्धोच्चारणे ध्यानं दीयते।

**शुद्धोच्चारणोपायाः**

१ . वर्णानांशुद्धोच्चारणाय आवृत्ति-पुनरावृत्तिरूपेण सम्यक् अभ्यासः करणीयः।

२ .प्रत्येकमप्यक्षरं शनैः शनैः वदेत्। नूतनशब्दानाम् उच्चारणावसरे विधिरयं अत्यन्तोपयोगी। अनेन छात्राणाम् आत्मविश्वासभावनायाः जागरणं भवति।

३ . छात्रेभ्यःबहुश्रवणाय अवसरः प्रदेयः। बहुश्रवणेन सह ते व्यवहारकुशलिनो भवन्ति। एवं छात्राः वारं वारं नूतननूतनशब्दानां श्रवणेन शुद्धोच्चारणाय अवसरं प्राप्नुवन्ति। कक्ष्यायामपि यः सम्यक् उच्चरति तेन सह संवादकरणेनापि उच्चारणे सामर्थ्यं प्राप्नुयुः। अपि च भौगोलिक-ऐतिहासिकयात्रास्वपि तेभ्यः शुद्धोच्चारणश्रवणाय अवसरान् कल्पयेत्।

**ग्रन्थ सूची - :**

1. अग्निपुराणम्, आचार्य बलदेव उपाध्याय, चौखम्बा प्रकाशन, वाराणसी-१९६०
2. अथर्ववेद, श्रीपाद दामोदर शातवलेकर, स्वाध्याय मण्डल - १९८५
3. ऐतरेयब्राह्मण, चौखम्बा संस्कृत संस्थान, वाराणसी - १९८७
4. वेदाङ्गशिक्षा का महत्व, डा. आलोक शर्मा, राष्ट्रिय संस्कृत साहित्य केन्द्र, जयपुर - २००४
5. सम्प्रदाय प्रबोधिनि शिक्षा, श्री गोपाल चन्द्र मिश्र, चौखम्बा विद्या भवन, वाराणसी - १९९९
6. पाणिनीय शिक्षा, डा. सत्यप्रकाश दुबे, राजस्थानी ग्रन्थागार, जोधपुर - २००४
7. वैदिकशिक्षा मीमांसा, डा. भास्कर मिश्र, नवीन प्रिण्टर्स, दिल्ली - १९९१
8. शिक्षासंग्रहः, आचार्य श्रीराम प्रसाद त्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी-१९८९
9. याज्ञवल्क्यशिक्षा, डा. नरेश झा, चौखम्बा सुर भारती प्रकाशन, वाराणसी-१९९१
10. श्री नारदीयशिक्षा, शिवराज आचार्य: कौण्डिन्यन्यायः, चौखम्बा विद्या भवन, वाराणसी-२००२